**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 13/01/2021 Accepted on : 28/01/2021 Publication Date: 31/01/2021

# साहित्यदर्पणदिशा उत्प्रेक्षास्वरूपचिन्तनम्

**सुरेश-घोषः**
गवेषकः (एम्-फिल्), संस्कृतविभागः, रामकृष्णमिशन्-विद्यामन्दिरम्, बेलुडमठः, हाबडा, पश्चिमवङ्गः, पिन – ७११२०२
Email Id: ghoshsuresh80@gmail.com

**शोधसारः** काव्यस्य शब्दार्थौ शरीरं, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलंकाराः कटककुण्डलादिवदित्यत्र प्रायः सर्वेषामेव आलंकारिकाणां सम्मतिरस्ति। अतः काव्यशरीरशोभावर्धने अलंकाराणां महती उपयोगिता विद्यते। सन्ति च तत्र वहवोऽलंकाराः, येषां चर्चा विद्वद्भिः भूयो विहिता। अलंकारेषु आन्यतम्यं भजते उत्प्रेक्षा। सा च उप्रेक्षा बहुधा विभक्ता सती बृहत्कलेवरा संवृत्ता। साहित्यदर्पणकारेण च तस्याः सुमहती चर्चा विहिता। तदेव संक्षेपेण अस्मिन् प्रबन्धे आलोचितम्।

**कुञ्चीशब्दाः –** उत्प्रेक्षा, अलंकारः, वाच्योत्प्रेक्षा, प्रतीयमानोत्प्रेक्षा।

**मूलग्रन्थः**

संस्कृतालंकारशास्त्रे उपमाया अनन्तरं महद् गुरुत्वं बिभर्ति उत्प्रेक्षालंकारः। अथ उत्-प्रपूर्वक ईक्ष्धातो अङ्- टाप् प्रत्ययेन उत्प्रेक्षाशब्दः निष्पद्यते। आचार्यभरतभामहादीन् आलंकारिकान् विहाय सर्वैः आलंकारिकैः उत्प्रेक्षालंकारः स्वीकृतः। परन्तु तत्स्वरूपविषये पण्डितानां मतानैक्यं परिलक्ष्यते। उत्प्रेक्षाशब्दस्यार्थः तावद्- उत् नाम उर्द्ध्वं प्राप्ता, प्रेक्षा नाम दृष्टिः प्रज्ञा वा यस्यामिति उत्प्रेक्षा। कवीनां समीपे उत्प्रेक्षालंकारः हि अत्यन्तं प्रियः अलंकारः। अलंकारशेखरे श्रेष्ठालंकाररूपेण स्वीक्रियते अलंकारोऽयम्। तत्र उत्प्रेक्षालंकारः सह नववध्वाः स्मितहास्येन तुलितम्। यत्र कवेः कल्पनाकाले कविप्रतिभा उत्कर्षं प्राप्ता, तत्र उत्प्रेक्षा भवति। प्रकृतस्याप्रकृतेन सह एकरूपतया यत् सम्भावनं स उत्प्रेक्षानामकोऽलंकारः। तदुच्यते काव्यप्रकाशे- ‘सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्’[1] इति। उत्प्रेक्षालंकारे उपमायोपमानयोर्मध्ये प्रबलं सादृश्यमस्ति। परन्तु उभयोर्मध्ये भेदज्ञानमपि विद्यते। स्थाणुर्वा पुरुषर्वा इत्यत्र संशयज्ञानं भवति। तत्कारणं हि अत्र ज्ञानस्य स्थाण्वंशे पुरुषांशे च समानबलत्वम्। केवलं स्थाणुरेवायम् इति कथ्यते चेत् तर्हि तत्र निश्चयज्ञानं भवति। यत्र संशयज्ञानं विद्यते पुनरपि निश्चयज्ञानस्य आधिक्यमपि विद्यते तत्र तु उत्प्रेक्षालंकारः भवति। लक्षणे सम्भावनमित्यस्यार्थः उत्कटैककोटिकः संशयः। संशये हि कोटिद्वयं वर्तते। परन्तु यस्मिन् संशये कोटिद्वयमध्ये एकस्याः कोटेः निश्चितप्रायत्वं स एव संशयः सम्भावनमित्युच्यते। यत्र तु असादृश्ययोः सम्भावनं सूच्यते तत्र उत्प्रेक्षालंकारः न भवति।

विश्वनाथस्य मते उत्प्रेक्षालंकारः हि ‘भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मनः’[2] इति। मम्मटविश्वनाथयोर्मध्ये मतविरोधो न दृश्यते। उभयोर्मध्ये केवलं भेदप्रसङ्गे विरोधः दृष्टः। यद्यपि मम्मटाचार्येण उत्प्रेक्षालंकारस्य भेदः न कृतः। परन्तु विश्वनाथाचार्येन वाच्यप्रतीयमानभेदेन द्विधा विभक्तोऽयम्। वाच्योत्प्रेक्षा नाम यत्र इवादीनां शब्दानां प्रयोगः भवति। वाच्योत्प्रेक्षालंकारस्य अपरं नाम हि शाब्दी उत्प्रेक्षा। पण्डितराजेन जगन्नाथेन वाच्योत्प्रेक्षालंकारस्य लक्षणमुच्यते- “इव-नूनम्-मन्ये-जाने-अवैमि-ऊहे-तर्कयामि-शङ्के-उत्प्रेक्षे इत्यादिभिः क्यङाचारक्विवादिभिः प्रतिपादकै सहिता यत्र उत्प्रेक्षासामग्री, तत्र वाच्योत्प्रेक्षा।”[3] इवादिशब्दस्याप्रयोगे प्रतीयमानोत्प्रेक्षालंकारः भवति। तदुच्यते रसागङ्गाधरे- ‘यत्र च प्रतिपादकशब्दरहितं तत्सामग्रीमात्रं तत्र प्रतीयमाना’[4] इति।

विश्वनाथस्य मते उत्प्रेक्षालंकारे उत्प्रेक्षणीयं वस्तु जाति-गुण-क्रिया-द्रव्यात्मकं भवति। अतएव वाच्योत्प्रेक्षा जात्यादिभेदेन चतुर्विधा। प्रतीयमानोत्प्रेक्षा अपि जात्यादिभेदेन पुनरेव चतुर्विधा। चतुर्विधा वाच्योत्प्रेक्षा पुनः भावाभावसम्भावनाभेदेन

---

[1] काव्यप्रकाशः। नारायणबनहट्टीसम्पादितः, पृ.- 584

[2] साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 706

[3] रसगङ्गाधरः। श्रीवदरीनाथझा – श्रीमदनमोहनझाभ्यां सम्पादितः, पृ.- 286

[4] तदेव।

द्विविधा भवति। अतो भावात्मकोत्प्रेक्षा अष्टविधा। अभावात्मिकाऽपि अष्टविधा। अतः षोडशप्रकारा उत्प्रेक्षा अपि निमित्तस्य गुणक्रियास्वरूपेण द्विविधा। अत साकल्येन द्वात्रिंशद्विधा।

अत भावाभिमाने जातिरूपाया वाच्योत्प्रेक्षाया उदाहरणं तावत्-

"उरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति।
सपातकः कनकमयो विजयस्तम्भः स्मरस्येव।।"[5] इति।

अत्र कस्याश्चित् नायिकायाः अनावृतोरू दृष्टा कार्मातनायकस्य इयमुक्तिः। अत्र नायिकायाः उरू उपमेयतया विजयस्तम्भश्चोपमानतया सम्भावयित्वा उत्प्रेक्षालंकारः भवति। अत्र विजयस्तम्भः अलीकः। अतोऽत्र जात्युत्प्रेक्षा। प्रसङ्गेऽस्मिन् विश्वनाथेन वृत्तौ उच्यते- अत्र विजयस्तम्भस्य बहुवाचकत्वात् जात्युत्प्रेक्षा। पुनः इवशब्दस्य प्रयोगे वाच्योत्प्रेक्षा। यद्यपि कामस्य विजयस्तम्भः अलीकः तथापि इदं वस्तु वास्तवम्। तस्मात् हेतोः भावपदार्थः। अत एव भावाभिमाने जात्युत्प्रेक्षा भवति।

अत्रैकः प्रश्नो भवति यत् उरूपमेयं विजयस्तम्भोपमानं यदि भवति तर्हि कथं उपमालंकारः न भवति। तदुत्तरे कथ्यते यत् उपमालंकारे उपमेयोपमानयोः उभयोरेव वास्तव्यं भवति। अत्र तु विजयस्तम्भरूपम् उपमानम् अवास्तवं भवति। तस्मात्कारणात् अत्र उत्प्रेक्षालंकारः भवति।

वाच्यगुणोत्प्रेक्षालंकारस्योदाहरणप्रसङ्गे उच्यते साहित्यदपर्णे-

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।"[6] इति।

श्लोकेऽस्मिन् गुणाः उपमेयं सप्रसवा उपमानम्। अत्र महाराजदिलीपस्य मौनत्वादि-गुणाः अन्यगुणसहचारिण इति सप्रसवत्वमिति मन्यते। अत्र सप्रसवत्वं गुणः। अतोऽत्र गुणोत्प्रेक्षा। इवादि शब्दस्य प्रयोगे वाच्योत्प्रेक्षा भवति।

वाच्यक्रियोत्प्रेक्षालंकारस्योदाहरणं तावत्- "गङ्गाम्भसि सुरत्राण! तव निर्याननिस्वनः। स्नातीवारिवधूवर्गगर्भपातनपातकी।।"[7] इति।।

श्लोकेऽस्मिन् कृष्णस्य प्रतापप्रशंसा सूचितम्। अत्र निर्याणनिस्वनस्य गङ्गापर्य्यन्तगमनक्रिया स्नानक्रियारूपेणोत्प्रेक्षितेति क्रियोत्प्रेक्षा भवति। अत्र शब्दस्य गङ्गास्नानरूपे उत्प्रेक्षायाः निमित्तरूपेण पापरूपगुणस्य प्रकाशनेन क्रियोत्प्रेक्षालंकारः भवति। तस्मात् हेतोः अत्र भावाभिमानो वाच्यक्रियोत्प्रेक्षालंकारः भवति।

वाच्यद्रव्योत्प्रेक्षालंकारस्योदाहरणं तावत्- "मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः"[8] इति।

श्लोकेऽस्मिन् नायिकायाः मुखमुपमेयम् अपरश्चन्द्रः उपमानम्। अत्र मुखस्यापरचन्द्रत्वेन कल्पनात् उत्प्रेक्षालंकारः भवति। प्रसङ्गेऽस्मिन् विश्वनाथेन वृत्तौ उच्यते- अत्र चन्द्र इत्येकव्यक्तिवाचित्वात् द्रव्यशब्दः इति। अत्र इवशब्दस्य प्रयोगे वाच्यद्रव्योत्प्रेक्षालंकारः भवति।

अधुना अभावाभिमानोत्प्रेक्षालंकारस्य विश्वनाथेन आलोचना क्रियते। आचार्यविश्वनाथेन क्रियोत्प्रेक्षालंकारस्योदाहरणम् उक्तं -

"कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ।
अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ।।"[9] इति।

अत्र अपश्यन्तौ इति पदेन दर्शनक्रियाभावः बोध्यते। तस्मात् कारणात् क्रियोत्प्रेक्षा। इवादिशब्दस्य प्रयोगेण वाच्योत्प्रेक्षा। यद्यपि विश्वनाथेन जातिगुणद्रव्याणामुदाहरणं न दीयते। परन्तु टीकाकारेण प्रत्येकमभावाभिमानस्योदाहरणं प्रदीयते। कुसुमप्रतिमाकारेण उच्यते अभावरूपजात्युत्प्रेक्षाविषये –

"अभावादिव पद्मिन्या हेमन्तेऽस्मिन् हिमच्छलात्।
नितान्तकातराकारो विवस्वानश्रु मुञ्चति।।"[10] इति।

---

[5] साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 708

[6] रघुवंशम्- 1/22

[7] साहित्यदर्पणः। उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 125

[8] तदेव।

[9] तदेव।

[10] कुसुमप्रतिमा। साहित्यदर्पणः, उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 126

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** **ISSN: 2581-6241** **Volume - 4, Issue - 1, Jan – 2021**
**Monthly, Peer-Reviewed, Refereed, Indexed Journal** **Impact Factor: 3.589**
**Received on : 13/01/2021** **Accepted on : 28/01/2021** **Publication Date: 31/01/2021**

अत्र पद्मिनी इत्यनेन बहुव्यक्तिवाचित्वाज्जातिशब्दः उक्तः। तस्मात् कारणात् जात्योत्प्रेक्षा। इवादि शब्दस्य प्रयोगे वाच्योत्प्रेक्षालंकारः भवति। गुणस्याभावाभिमानोत्प्रेक्षालंकारस्योदाहरणं तावत्-

"इन्द्रोरयोगादिव लुण्ठताङ्गीं दिने द्विरेफो मधु पातुमिच्छन्।
कुमुद्वतीं मुद्वियुतामुपैति प्रायो वियुक्तां हि विटः प्रयाति।।"[11] इति।

अत्र इन्द्रोः संयोगरूपगुणस्याभावः उत्प्रेक्षितः। अत्र इवादिशब्दस्य प्रयोगेण वाच्योत्प्रेक्षालंकारः।
तत्रैव द्रव्यस्याभावाभिमानालंकारस्योदाहरणं यथा-

"समुचितनवसन्ध्यारक्तवासो वसाना मलिनमुखसरोजा लब्धताराक्षमाला।
विगलितशिशिराश्रुः सा दिनश्रीरभावात् सवितुरिव विषण्णा मर्त्यधाम व्यमुञ्चत्।।"[12] इति।

अत्र सवितृशब्दवाच्यस्य सूर्यरूपद्रव्यस्याभाव उत्प्रेक्षितः।

इत्थं वाच्योत्प्रेक्षाया भेदा दर्शितः। इदानीं तेषामेव गुणनिमित्तकं क्रियानिमित्तकं भेदद्वयं प्रदर्श्यते। अत्र गुणनिमित्तकस्योदाहरणं तावत्-

"गङ्गाम्भसि सुरत्राण! तव निर्याणनिस्वनः। स्नातीवारिवधूवर्गगर्भपातनपातकी।।"[13] इति।

पूर्वे स्नातीव इत्यत्र क्रियोत्प्रेक्षालंकारः इति कथितम्। किमर्थं स्नानं कृतम्? तदुत्तरे कथ्यते यत् पापकारिणां पापक्षालनार्थं स्नानं कृतम्। अत्र स्नानक्रियायाः निमित्तं हि पातकित्वम्। शास्त्रे तु पापरूपः व्यापारः हि गुणः। अत्र पापेन अधर्मो बोध्यते। एवं प्रकारेण निमित्तस्य गुणरूपः अलंकारः बोध्यते। अथ क्रियानिमित्तकत्वस्योदाहरणं यथा-

"कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ।
अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ।।"[14] इति।

श्लोकेऽस्मिन् अभावाभिमानो क्रियोत्प्रेक्षालंकारः भवति। अत्र गण्डयुगलं किमर्थं क्षीणं स्यात्? तदुत्तरे कथ्यते यत् परस्परस्य दर्शनाभावात्। अत्र क्षीणमिति पदं क्रियापदम्। अत एव इदं निमित्तस्य क्रियारूपम्। एवं प्रकारेण जात्युत्प्रेक्षा द्रव्योत्प्रेक्षायाश्च उदाहरणमवगन्तुं शक्यते इति विश्वनाथेन ज्ञापितम्।
अधुना प्रतीयमानोत्प्रेक्षालंकारस्योदाहरणं दीयते। साहित्यदर्पणे तदुदाहरणं यथा-

"तन्वङ्ग्या स्तनयुग्मेन मुखं न प्रकटीकृतम्।
हाराय गुणिने स्थानं न दत्तमिति लज्जया।।"[15] इति।

अत्र कृशाङ्ग्याः स्तनयुग्मेन सूत्रग्रन्थिताय अन्यत्र विद्यादयादाक्षिण्यादिगुणशालिने हाराय स्थानं न दत्तमिति लज्जयेव मुखं न प्रकाशितमिति। एकत्र उक्तया लज्जया अन्यत्र तु वसनावृततयेति भावः। अत्र लज्जा उत्प्रेक्षिता। अत्र लज्जा इति भावपदार्थः। अपि च लज्जा इति मानसिकगुणः। अत एव श्लोकोऽयं भावाभिमानहेतुभूतगुणोत्प्रेक्षालंकारः भवति। इवशब्दस्याप्रयोगे प्रतीयमानोत्प्रेक्षा।
अत्र प्रतीयमानोत्प्रेक्षायां हेतुभूत-जात्युत्प्रेक्षायाः उदाहरणं तावत् साहित्यदर्पणे-

"सार्द्धं युवोरसा युद्धे कठिनात्मा जयार्जितात्।
वीरत्वादिव सम्प्राप्तेस्तुङ्गत्वं तरुणीस्तनः।।"[16] इति।

अत्र इवादिशब्दस्याप्रयोगे प्रतीयमानोत्प्रेक्षा। अत्र हेतुभूतवीरत्वजातेः उत्प्रेक्षणात् जात्युत्प्रेक्षा।
अतः कुसुमप्रतिमाकारेण प्रतीयमाना द्रव्योत्प्रेक्षालंकारस्योदाहरणं प्रदत्तं -

"यामिन्याः प्रथमे यामे द्रुतं प्रवसवा सता।

---

[11] तदेव।

[12] तदेव।

[13] कुसुमप्रतिमा। साहित्यदर्पणः, उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 125

[14] साहित्यदर्पणः। उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 125

[15] साहित्यदर्पणः। उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 127

[16] कुसुमप्रतिमा।साहित्यदर्पणः, उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 131

एकान्तस्मरसन्तप्ता त्वया सा भुवि शायिता।।”[17] इति।

अत्रापि इवादिशब्दस्याप्रयोगात् त्वयेति प्रतीयमाना हेतुभूतद्रव्योत्प्रेक्षा।

ध्वनिप्रकरणे सर्वः अलंकारः व्यङ्ग्यः। तथापि कथं प्रतीयमानोत्प्रेक्षा इति उच्यते। तदुत्तरे कथ्यते यत् व्यङ्ग्योत्प्रेक्षायाः वस्तुना अलंकारेण वा यत्र उत्प्रेक्षाध्वनिः भवति तत्र उत्प्रेक्षायामुत्प्रेक्षणं विना वाक्यस्य परिसमाप्तिः सम्भवति। मतमिदं प्रतिष्टापयितुं विश्वनाथेन उदाहरणमेकं कथ्यते-

“महिलासहस्मभरिए तुह हिअए सुहअ! सा अमाअन्तो।

अणुदिणमणस्मकस्मा अङ्गं तणुअं पि तणु एइ”[18] इति।।

अत्र नायिका नायकस्य हृदये स्थानं न प्राप्ता। तस्मात् कारणात् नायिकायाः शरीरं विरहदुःखेन कृशतां गतम्। अत्र कृशतायाः कारणं हि नायकस्य हृदये स्थानस्य अप्राप्तिः। अत एव काव्यलिङ्गमिति अलंकारः भवति। तल्लक्षणं च- ‘हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते’[19]। अपि च नायिकायाः देहं कृशतां कर्त्तुं नायकस्य हृदये स्थानं न प्राप्तम्। अत्र सति हेतौ फलाभावो विशेषोक्तिर्निगद्यते इति लक्षणेन विशेषोक्तिरलंकारः व्यञ्जितः। अत एव काव्यलिङ्गालंकारेण विशेषोक्तिः ध्वनितः। अतः उभयोरङ्गाङ्गिभावे संकरलंकारः भवति।

अत्र नायिकया नायकस्य हृदये स्थानं न प्राप्तमिति तु न वास्तवं सत्यम्। नायिकया नायकस्य हृदये स्थानं न प्राप्तमित्यत्र सम्भावना ध्वनिता। ‘न भान्ति’ इत्यस्मिन् प्रकारे क्रियोत्प्रेक्षा अभावाभिमानात्मिका। अत्र इवादिशब्दः नास्ति तथापि इवादिशब्दस्य ग्रहणेन वाक्यसमाप्तिः भवति। तस्मात् प्रतीयमानोत्प्रेक्षा। तस्माद्धेतोः व्यङ्ग्योत्प्रेक्षा।

अत एव इवादिशब्दं गृहीत्वा उत्प्रेक्षां (इवादिशब्दस्याग्रहणम्) विना वाक्यसमाप्तिः भवति तत्र व्यङ्ग्योत्प्रेक्षा।

आचार्यविश्वनाथेन प्रतीयमानोत्प्रेक्षाया व्यङ्ग्योत्प्रेक्षायाः च भेदप्रदर्शनेन नवीनः पन्था सूच्यते। वाच्योत्प्रेक्षाप्रतीयमानोत्प्रेक्षयोः मध्ये वाच्योत्प्रेक्षाया षोडशप्रकाराः भेदाः। अतः षोडशप्रकारवाच्योत्प्रेक्षायाः द्रव्योत्प्रेक्षां विना जात्युत्प्रेक्षागुणोत्प्रेक्षा-क्रियोत्प्रेक्षा द्वादशप्रकाराः भेदाः। पुनः द्वादशप्रकाराः भेदाः स्वरूपफलहेतुभेदेन त्रिधा। अत उत्प्रेक्षायाः षड्त्रिंशद्भेदाः। द्रव्योत्प्रेक्षा केवलं स्वरूपोत्प्रेक्षाभेदेन चत्वार इति। अत एव साकल्येन वाच्योत्प्रेक्षा चत्वारिंशद्भेदाः। फलोत्प्रेक्षा-हेतूत्प्रेक्षा- स्वरूपोत्प्रेक्षाणां संज्ञाप्रसङ्गे हरिदासेन उच्यते- “तादर्थ्यचतुर्थ्यन्तेन तुमुनन्तेन वा पदेन यत्रोत्प्रेक्षा सा फलोत्प्रेक्षा। हेतुविभक्त्यन्तपदेनोत्प्रेक्षा हेतूत्प्रेक्षा। ताभ्यामितरा स्वरूपोत्प्रेक्षा इति तर्कवागीशः”[20] इति।

जातेः स्वरूपोत्प्रेक्षाया उदाहरणप्रसङ्गेण पूर्वोक्तात् उरूः कुरङ्गकदृश इत्यादि श्लोकात् स्मरस्य विजयस्तम्भः इति विश्वनाथेन उद्धृतम्। अत्र नायिकाया उरूरूपपदार्थं वास्तवम्। उरूरूपपदार्थं कामदेवस्य विजयस्तम्भरूपे उत्प्रेक्षितः। तस्मात् कारणात् स्वरूपोत्प्रेक्षा।

गुणस्य स्वरूपोत्प्रेक्षाया उदाहरणप्रसङ्गे पूर्वोक्तं ज्ञानेमौनमित्यादि श्लोकात् सप्रसवा इव इत्यंशे लक्ष्यते। मौनप्रभृतिगुणाः सप्रसवत्वगुणरूपेण उत्प्रेक्षिताः।

क्रियायाः स्वरूपोत्प्रेक्षायाः उदाहरणरूपेण पूर्वोक्तं गङ्गाम्भसि इति श्लोको उल्लिख्यते। अत्र स्नानक्रियारूपेणोत्प्रेक्षितेति क्रियोत्प्रेक्षा भवति।

द्रव्यस्य स्वरूपोत्प्रेक्षायाः उदाहरणरूपेण पूर्वोक्ते मुखमेणीदृश इत्यंशे मुखस्य अपरचन्द्रत्वेन कल्पनात् द्रव्योत्प्रेक्षालंकारः भवति। तत्कारणं हि चन्द्रः हि द्रव्यं न तु जातिः।

साहित्यदर्पणे फलगतायाः क्रियोत्प्रेक्षायाः उदाहरणं यथा-

“रावणस्यापि रामास्तो भित्वा हृदयमाशुगः।

विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्।।”[21] इति।

अतः आख्यातुमिव इत्यत्र तुमुन्प्रत्ययान्तं पदं क्रियापदेन उत्प्रेक्षितं भवति। तस्मात् फलगता क्रियोत्प्रेक्षा भवति।

हेतूत्प्रेक्षाया उदाहरणप्रसङ्गेण रघुवंशमहाकाव्यस्य त्रयोदशसर्गस्थं पद्यमुच्यते-

---

[17]कुसुमप्रतिमा। साहित्यदर्पणः, उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 128

[18] साहित्यदर्पणः। उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 128

[19] काव्यप्रकाशः। नारायणबनहट्टीसम्पादितः, पृ.- 783

[20] कुसुमप्रतिमा।साहित्यदर्पणः, उदयचन्द्रवन्द्योपाध्यायसम्पादितः, पृ.- 129

[21] साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 712

"सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्।।"[22] इति।

अत्र नूपुरः बद्धमौनमस्ति। तत्कारणं हि दुःखम्। अत्र दुःखं हि गुणपदार्थः। अत्र इवादिशब्दस्य प्रयोगेण वाच्योत्प्रेक्षा। अत्र हेतुभूतगुणोत्प्रेक्षालंकारः भवति।

पुनः स्वरूपोत्प्रेक्षा द्विधा विभज्यते। तथा च - उक्तः अनुक्तश्च। तदुच्यते साहित्यदर्पणे- उक्त्यनुक्तयोर्निमित्तस्य द्विधा तत्र स्वरूपगाः इति। अत एव साकल्येन वाच्योत्प्रेक्षायाः षट्पञ्चाशद्भेदाः। निमित्तस्योपादानं स्वरूपोत्प्रेक्षाया उदाहरणं पूर्वकथिते गङ्गाम्भसि इत्यादिश्लोके दृश्यते। अत्र स्नाति इव इत्यंशे क्रियोत्प्रेक्षा भवति। तस्य निमित्तं हि पातकित्वरूपः गुणः। स चात्र उक्तः।

निमित्तानुपादानस्योदाहरणतया- 'मुखम् एणीदृशी' इति पूर्वोक्तं पद्यं प्रदत्तम्। श्लोकेऽस्मिन् चन्द्र इवापर इत्यत्र तथाविधसौन्दर्याद्यतिशयो नोपात्तः।

स्वरूपोत्प्रेक्षा निमित्तस्योपादानानुपादानभेदेन द्विधा विभज्यते। परन्तु हेतूत्प्रेक्षायां फलोत्प्रेक्षायां च ईदृशो विभागः न सम्भवति। तत्कारणं हेतूत्प्रेक्षायां फलोत्प्रेक्षायां च निमित्तस्योपस्थितिः अवश्यमेव प्रयोजनीयास्ति। निमित्तस्य किं प्रयोजनम्, तस्योदाहरणेन यथा-

"सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्।।"[23] इति।

पूर्वमुक्तमिदमुदाहरणम्। अत्र नूपुरस्य मौनत्वं प्रति कारणं हि विश्लेषदुःखम्। भाषापरिच्छेदनये दुःखं हि गुणपदार्थः। अत्र निमित्तस्य गुणरूपत्वं स्यात्। श्लोकेऽस्मिन् यदि बद्धमौनत्वमिति नोक्तं स्यात् तर्हि विश्लेषदुःखात् इत्यत्र हेतूत्प्रेक्षा असङ्गता स्यात्।

एवमपि रावणस्यापि इत्यादि पूर्वोक्ते श्लोके आख्यातमिव इत्यंशे फलोत्प्रेक्षा भवति।

प्रतीयमानोत्प्रेक्षा षोडशप्रकाराः भेदाः। तत् षोडशप्रकाराः पुनः फलगतहेतुगतभेदेन द्विधा। फलगतोत्प्रेक्षायाः उदाहरणं पूर्वं कथितं रावणस्यापि इत्यादि श्लोके प्राप्तम्। अत्र श्लोके उरगेभ्य इव प्रियम् इति स्थाने उरगेभ्यः किल प्रियम् इति पाठान्तरः कर्तव्यः। यदि इवादिशब्दस्य प्रयोगः क्रियते, तर्हि वाच्योत्प्रेक्षा भवेत्। तन्निषेधाय किल शब्दस्य प्रयोगे प्रतीयमानोत्प्रेक्षा भवति। अत्र आख्यातुमिव इत्यत्र तुमुन्प्रत्ययान्तं क्रियापदेन उत्प्रेक्षितं भवति। तस्मात् फलगता प्रतीयमानोत्प्रेक्षा स्यात्।

साहित्यदर्पणे हेतुगतोत्प्रेक्षायाः उदाहरणमिदं तावत्-

"तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्।
हाराय गुणिने स्थानं न दत्तमिति लज्जया।।"[24] इति।

अत्र मुखं न प्रकाशितं, तत्कारणं हि श्लोकेऽस्मिन् हेतूत्प्रेक्षालंकारः। अतः उत्प्रेक्षायां निमित्तस्योल्लेखः अवश्यमेव स्यात्।

प्रतीयमानोत्प्रेक्षायां द्रव्यगुणक्रियादीनां स्वरूपगतोत्प्रेक्षा न स्यात्। तत्कारणं हि उत्प्रेक्षायां प्रकृतभूतविशेषण सह अप्रकृतस्य सम्भावना मनसि जायते। अतिशयोक्तिरूपकालंकारयोः अपि उपमेयभूतविशेषण सह उपमानस्य तादात्म्यं गृह्यते। यद्यपि प्रतीयमानोत्प्रेक्षायां इवादिः सम्भावनावाचकः शब्दो न तिष्ठति, अपि च असम्भवार्थकवाचकविशेषणस्य प्रयोगः भवति तथापि प्रतीयमानोत्प्रेक्षा तस्मिन् स्थले न भवति। अतिशयोक्तिः अलंकारः एव तत्र भवति।

अत अष्टाशीतिप्रकारयोर्वाच्यप्रतीयमानयोरुभयोरपि समस्तानेव भेदान् पुनरपि उपमेयस्य प्रयोगाप्रयोगभेदेन द्विधा विभज्यते। उपमेयस्य प्रयोगे उत्प्रेक्षायाः उदाहरणं यथा- उरूकुरङ्गकदृशः इत्यादि। अत्र उरू उपमेयः विजयस्तम्भः उपमानं च। श्लोकेऽस्मिन् उपमेयम् उरू इति शब्देन उक्तं स्यात्। तस्मात् श्लोकेऽस्मिन् उपमेयस्य प्रयोगेण उत्प्रेक्षालंकारः बोध्यते। परन्तु उपमेयस्य अप्रयोगेऽपि उत्प्रेक्षालंकारः भवति। विश्वनाथविरचिते प्रभावती इति नाटके उक्तं-

"घटितमिवाञ्जनपुञ्जैः पूरितमिव मृगमदक्षोदैः।
ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम्।।"[25] इति।

---

22 साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 712

23 तदेव।

24 साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 714

25साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 716

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 13/01/2021 Accepted on : 28/01/2021 Publication Date: 31/01/2021

अत्र घटितत्वं हि उत्प्रेक्षायाः विषयः। अत्र अञ्जनघटितत्वादेरित्यनेन सम्बन्धः उपमानभूतस्येत्यर्थः। अस्मिन्नुदाहरणे तिमिरपटलेन भूवनव्यापनरूपमुपमेयं नाभिहितमिति अर्थः प्रकाशितः।

वैचित्र्यं हि अलंकारस्य प्राणस्वरूपम्। यदि उत्प्रेक्षालंकारस्य अन्यालंकारात् उत्पत्तिः स्यात् तर्हि सोऽधिकं मनोज्ञो भवति इति विश्वनाथमतम्। अस्योदाहरणं यथा-

"अश्रुच्छलेन सुदृशो हुतपावकधूमकलुशाक्ष्याः।
अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव।।"[26] इति।

अत्र अपह्नुतेरलंकारात् उत्प्रेक्षालंकारस्य उत्पत्तिः भवति। श्लोकेऽस्मिन् उपमेयमश्रुं प्रतिषिध्य उपमानभूतलावण्यवारिपूरस्थापनादपह्नुतिः। अत्र लावण्यरसस्याधारः हि शरीरम्। तस्मिन् शरीरे स्थानं न प्राप्तो लावण्यरसप्रवाहः अश्रुरूपेण विगलितः भवति। शरीरे स्थानाभावः विगलनस्य हेतुरूपेण उत्प्रेक्षितः। तस्मादत्र हेतूत्प्रेक्षालंकारः भवति। अतः अलंकृतिरियम् अपह्नवमूला उत्प्रेक्षा। अपि च श्लेषालंकारात् उत्प्रेक्षालंकारस्य उदाहरणं यथा-

"मुक्तोत्करः संकटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः।
जानिमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद्गुणवत्त्वमाप।।"[27] इति।

अत्र गुणवत्त्व इति शब्दे श्लेषः अस्ति। गुणवत्त्वशब्दस्यार्थद्वयं विद्यते – सूत्रवत्त्वम्, अपरं च गुणयुक्तम् इति। अत्र गुणवत्त्वं मुक्तस्य हेतुरूपेण कम्बुग्रीवाधिवासः इति शब्दः उत्प्रेक्षितः। अत एव उदाहरणमिदं हेतूत्प्रेक्षाया। श्लोकेऽस्मिन् इवादिसादृश्यवाचकः शब्दः नास्ति। तर्हि किं प्रतीयमानोत्प्रेक्षा भवति? तदुत्तरे शास्त्रकारेण कथ्यते यत् श्लोकोऽयं वाच्योत्प्रेक्षायाः। तत्कारणं हि यद्यपि इवादिशब्दस्य प्रयोगः न जातः तथापि जानीमहे इति क्रियापदेन उत्प्रेक्षा अभिहिता। प्रसङ्गेऽस्मिन् विश्वनाथेन उच्यते- मन्ये शङ्के ध्रुवं प्रायो नूनमित्यादि शब्दः उत्प्रेक्षावाचकः। अत्र आदिपदेन जानीमहे सम्भावयामः उत्प्रेक्षामहे खलु किल इव किमु ननु प्रभृतीनां ग्रहणं भवति।

परिशेषे वक्तुं शक्यते यत् सम्भवनामूलकालंकाराणां मूलभूतालंकारस्तावत् उत्प्रेक्षालंकारः। न केवलं संस्कृतसाहित्ये, अपि च संस्कृतेतरसाहित्येषु अपि उत्प्रेक्षायाः प्रयोगाधिक्यं दृश्यते इति शिवम्।

## सहायकग्रन्थमाला :


१ दण्डी. काव्यादर्शः. सम्पा. चिन्मयीचट्टोपाध्याय, कोलकाता, पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०१८

२ भोज. सरस्वतीकण्ठाभरणम्. सम्पा. पण्डितकेदारनाथशर्मा तथा वासुदेवलक्ष्मणशास्त्रीपणशीकर, वोम्बे, निर्णय-सागरप्रेस, १९३४

३ भामह. काव्यालंकारः. सम्पा. रामानन्द-शर्मा, वाराणसी, चौखम्बा-संस्कृत-सीरीज-आफिस, २०१०

४ भरतमुनि. नाट्यशास्त्रम्. सम्पा. पारसनाथद्विवेदी, वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, १९९२

५ मम्मट. काव्यप्रकाशः. सम्पा. नारायणबनहट्टी, दिल्ली, परिमलपब्लिकेशन्स, २०१२

६ रुद्रट. काव्यालंकारः. सम्पा. श्रीरामदेवशुक्ल, वाराणसी, चौखम्बा-विद्याभवन, १९६६

७ वामन. काव्यलंकारसूत्रवृत्तिः. सम्पा. श्रीकृष्णसूरि, श्रीरङ्गनगर, श्रीवाणीविलासमुद्रायन्त्रालय, १९०२

८ विश्वनाथ. साहित्यदर्पणः, सम्पा. उदयचन्द्रवन्द्योपाध्याय, कोलकाता, संस्कृत-वुक्-डिपो, २०१७

९ विश्वनाथ. साहित्यदर्पणः, सम्पा. कृष्णमोहन-शास्त्री, वाराणसी, चोखाम्बा-संस्कृत-संस्थान,२०१८


---

[26] साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 717

[27] साहित्यदर्पणः। कृष्णमोहनसम्पादितः, पृ.- 718